# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – शास्त्री-3** | **प्रश्नपत्रम् – 6** | **गुणाः – ५०** |
| **विषयः – वेदः** | **सत्रम् – 6** | **समयः – १० तः १२** |
| **दिनाङ्कः – १९/०७/२०२१** | **सन्दर्भग्रन्थः – सामवेदः (नियतांशः), शाकूनसूक्तम् (ऋग्वेदः)** | |

**सूचना - निम्नलिखितेषु दशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः ।**
**प्रत्येकं प्रश्नस्य समानगुणाः । (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः मन्त्रयोः व्याख्या कार्या ।**

१ ॐ अग्निं दूतं वृणीमहे होतारं विश्ववेदसम् ।
अस्य यज्ञस्य सुक्रतुम् ॥

२ ॐ नमस्ते अग्न ओजसे गृणन्ति देव कृष्टयः ।
अमैरमित्रमर्दय ॥

३ ॐ अग्ने रक्षाणो अं हसः प्रतिस्म देवरीषतः ।
तपिष्ठैरजरो दह ॥

**प्रश्नः २ सामवेदस्य आग्नेयपर्वणः प्रथमखण्डमवलम्ब्य अग्नेर्वैशिष्ट्यं लिखत ।**

**प्रश्नः ३ आग्नेयपर्वणः प्रथमाध्यायस्य द्वितीयखण्डस्य प्रतिपाद्यविषयं निबन्धात्मकं वर्णयत ।**

**प्रश्नः ४ कयोरपि द्वयोः मन्त्रयोः व्याख्या कार्या ।**

१ ॐ पाहि नो अग्न एकया पाह्युत द्वितीयया ।
पाहि गीर्भिस्तिसृभिरूर्जां पते पाहि चतसृभिर्वसो ॥

२ ॐ देवो वः द्रविणोदाः पूर्णां विवष्ट्वासिचम् ।
उद्वा सिंचध्वमुपवा पृणध्वमादिद्धो देव ओहते ॥

३ ॐ आजुहोता हविषा मर्जयध्वं नि होतारं गृहपतिं दधिध्वम् ।
इडस्पदे नमसा रातहव्यं सपर्यता यजतं पस्त्यानाम् ॥

**प्रश्नः ५ आग्नेयपर्वणः प्रथमाध्यायस्य पञ्चमखण्डस्य प्रतिपाद्यविषयं निबन्धात्मकं लिखत ।**

**प्रश्नः ६ अग्नेः शकासाद् यजमानाः ऋत्विजश्च किम् इच्छन्ति ग्रन्थोक्तदिशा वर्णयत ।**

**प्रश्नः ७ कयोरपि द्वयोः मन्त्रयोः ससन्दर्भं व्याख्या कार्या ।**

१ ॐ कनिक्रदज्जनुषं प्रब्रुवाण इयर्ति वाचमरितेव नावम् ।
सुमङ्गलश्च शकुने भवासि मा त्वा का चितभिभाविश्व्याविदत् ॥

२ ॐ अवक्रन्द दक्षिणतो गृहाणां सुमङ्गलो भद्रवादी शकुन्ते ।
मानः स्तेन ईशत माघशंसो बृहद्वदेम विदथे सुवीराः ॥

३ ॐ उद्गातेव शकुने साम गायसि ब्रह्मपुत्र इव सवनेषु शंससि ।
वृषेव वाजी शिशुमतीरपीत्या सर्वतोनः शकुने भद्रमा वद विश्वतो नः शकुने पुण्यमा वद ॥

**प्रश्नः ८ ग्रन्थोक्तदिशा शाकुनसूक्तस्य वर्ण्यविषयं निबन्धात्मकं वर्णयत ।**

**प्रश्नः ९ उद्गातुः शकुनेश्च गुणसाम्यतां सोदाहरणं निबन्धयत ।**

**प्रश्नः १० अधोलिखितेषु दशानां लघूत्तराणि लिखत ।**

१ 'अग्न आयाहि..' इत्येषा ऋचा केन ऋषिणा दृष्टा ?
२ 'गृणानः' इत्यस्य अर्थः कः ?
३ 'विश्ववेदसम्' इत्यस्य पदस्य विग्रहः कः ?
४ आग्नेयपर्वणः प्रथमाध्यायस्य प्रथमखण्डे कति ऋचः सन्ति ?
५ 'ओजसे' इति पदस्यार्थः कः ?
६ 'जामयः' इति पदस्यार्थः कोऽस्ति ?
७ 'रीषतः' इत्यस्य पदस्यार्थः कोऽस्ति ?
८ प्रथमाध्यायस्य चुतुर्थखण्डस्य यज्ञायज्ञा वो इत्यस्य ऋचः ऋषिः कः ?
९ 'अध्वरस्य' इत्यस्य पदस्य कः अर्थः ?
१० प्रथमाध्यायस्य षष्ठे खण्डे कति ऋचः सन्ति ?
११ शाकुनसूक्तम् ऋग्वेदस्य कस्मिन् मण्डले वर्तते ?
१२ 'कनिक्रदत्' इति पदस्य कः अर्थः ?
१३ 'सुपर्णः' इति पदस्यार्थः कोऽस्ति ?
१४ 'शकुने' इत्यस्य पदस्य कोऽर्थो वर्तते ?
१५ 'उद्गातेव साम' इत्यस्यार्थः कोऽस्ति ?

****